अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम् ।
कराग्रं यो न धुनुयात् विस्फोटो वा न जायते ।
शुद्धो भवति धर्म्मेण पितामहवचो यथा ॥
कल्पान्तरमाह ।
सौवर्णे राजते ताम्रे आयसे मृण्मयेऽपि वा ।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥
सौवर्णीं राजतीं ताम्रीमायसीञ्च सुशोधिताम् ।
सलिलेन सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकाम् ॥
भ्रमद्वीचितरङ्गाढ्ये न खस्पर्शगोचरे ।
परीक्षेतार्द्रपर्णेन चुचुकारं सघोषकम् ॥
ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् ।
परं पवित्रममृतं घृत ! त्वं यज्ञकर्म्मसु ॥
दह पावक ! पापं त्वं हिमशीतः शुचौ भव ।
उपोषितं ततः स्नातमार्द्रवाससमागतम् ॥
ग्राहयेन्मुद्रिकां ताञ्च घृतमध्यगतान्तथा ।
प्रदेशिनीञ्च तस्याथ परीक्षेयुः परीक्षकाः ॥
यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिः॥
प्रयोगस्तु । मध्यशिराष्टयवतङ्गुलमध्यमिताङ्गुलिषोडशाङ्गुलमितप्रस्तारे तथाविधाङ्गुलिचतुष्टयखाते ताम्रादिघटितेऽशक्तौ मृण्मये वा चक्राकारे वर्त्तुले पात्रे लौकिकाष्टरत्तिकाधिकमाषद्वयाधिकत्रयस्त्रिंशत्तोलकरूप- ३३ । २ ।८। वैदिकपलदशकमितं घृतं एवं तैलञ्च निक्षिप्य लौकिकचतुरत्तिकाधिकपञ्चमाषकषट्षष्टितोलकरूप- ६६।५ । ४ । वैदिकविंशतिपलपरिमितं केवलं गव्यं घृतं वा निक्षिप्य तस्मिन् सुतप्ते सकृद्धौतां पञ्चरत्तिकामितां काञ्चनमुद्रिकां रजतादिकां वा निक्षिपेत् । धर्म्मावाहनादिहवनान्तं तुलोक्तं सदक्षिणं कर्म्म कृत्वा,—
ओम् परं पवित्रममृतं ! घृत त्वं यज्ञकर्म्मसु ।
दह पावक ! पापं त्वं हिमशीतः शुचौ भव ।
इत्यनेनाभिमन्त्रयेत् प्राड्विवाकः । ततः कृतोपवासः स्नातार्द्रवासाः शोध्यशिरसि प्रतिज्ञापत्रं निधाय,—
ओम् त्वमग्ने ! सर्व्वभूतानामन्तश्चरसि पावक !!
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं करे मम ॥
इत्यनेनाभिमन्त्र्य आर्द्रपत्रनिक्षेपजातचुचुकशब्दात् घृतात् मुद्रिकां तर्ज्जन्यङ्गुष्ठाभ्यां उत्तोलयेत् । घृततैलाभ्यां वा तप्तमाषकमुत्तोलयेत् । अदग्धश्चेत्तदा शुद्ध इति । ततो दक्षिणां दद्यात् ॥”
इति दिव्यतत्त्वम् ॥
तप्तमुद्रा, स्त्री, (तप्ता अग्निसन्तप्ता मुद्रा ।) शरीरधार्य्यार्पितप्तधातुमयभगवदायुधचिह्नम् । यथा,
“आषाढ़शुक्लद्वादश्यां हरौ शिशयिषौ सति ।
वैष्णवः पारणं कृत्वा तप्तमुद्राश्च धारयेत् ॥
ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्चैकान्तितद्व्रये ।
कुर्व्वन्नात्मार्पणं तप्तमुद्राभिर्द्देहमङ्कयेत् ॥*॥
तप्तमुद्राधारणं वाराहे तप्तमुद्राप्रसङ्गे ।
चक्रादिधारणं पुंसां परं सम्बन्धवेदनम् ।
पातिव्रत्यनिमित्तं हि वलयादिविभूषणमिति ॥*
अथ तप्तमुद्राधारणनित्यता । वायुपुराणे ।
अग्निनैव च सन्तप्तं चक्रमादाय वैष्णवः ।
धारयेत् सर्व्ववर्णानां हरिसालोक्यसिद्धये ॥”
ब्रह्माण्डे ।
कृत्वा धातुमयीं मुद्रां तापयित्वा स्वकां तनूम् ।
चक्रादिचिह्नितां भूप ! धारयेद्वैष्णवो नरः ॥
नारदीयपञ्चरात्रे ।
द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् ।
हरेः सुदर्शनं तप्तं धारयेत्तद्विपश्चितः ॥
सौपर्णे च श्रीभगवद्गरुडसम्वादे तप्तमुद्राप्रकरणे ।
गरुडाश्रमविशेषेण सर्व्वपर्णेष्वयं विधिः ।
विप्रो वा क्षत्त्रियो वापि वैश्यः शूद्रस्तथैव च ॥
पाद्मे ।
अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ।
ब्राह्मणस्य तथैवेदं तप्तचक्रादिधारणम् ॥
किञ्च । तत्रैवोत्तरखण्डे श्रीशिवोमासम्वादे ।
शङ्खचक्राङ्कनं कुर्य्याद्ब्राह्मणो बाहुमूलयोः ।
हुताग्निनैव सन्ताप्य सर्व्वपापापनुत्तये ॥
चक्रं वा शङ्खपद्मे वा तथा पञ्चायुधानि वा ।
धारयित्वैव विधिवद्यज्ञकर्म्म समारभेत् ॥*॥
किञ्च । तत्प्रसङ्ग एव ।
अधृत्वा विधिना चक्रं ब्राह्मणः प्राकृतो भवेत् ॥
किञ्च ।
न तस्य किञ्चिदस्तीयादपि हव्यकव्यकम् ।
सर्व्ववेदविदो वापि सर्व्वशास्त्रविशारदः ॥
अधृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत् ॥
किञ्च ।
तप्तेनैवाङ्कनं कुर्य्यात् ब्राह्मणस्य विधानतः ।
यौतस्मार्त्तादिसिद्ध्यर्थं मन्त्रसिद्ध्यै तथैव च ॥
हरेः पूजाधिकारार्थं चक्रं धार्य्यं विधानतः ।
वैष्णवत्वस्य सिद्ध्यर्थं भक्तिसिद्ध्यै विशेषतः ॥
किञ्च ।
उपवीतादिवद्धार्य्याः शङ्खचक्रादयस्तथा ।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥*॥
श्रुतयश्च । यो ह वै सुश्लोकमौर्वेधर्म्मानन्नुतिष्ठमानोऽग्निनाचक्रं धत्ते । अग्निर्वै सहस्रारः सहस्रारो नेमिर्न्नेमिना तप्ततनुः सायुज्यं सलोकतामाप्नोतीति ॥
चक्रं बिभर्त्ति वपुषाभितप्तं
बलं देवानाममृतस्य विष्णोः ।
स एति नाकं दुरितं विधूय
विशन्ति यद्यतयो वीतरागा इति ॥”
बह्वृचपरिशिष्टे । अतप्ततनुर्न्नतदामो अश्नुतेऽशृता स इद्वहन्तस्तत्समाशतेति वजुः ॥ ऋग्वेदीयाश्वलायनशाखायाञ्च ।
प्रतप्तशौरेरयचक्रे सुतप्ते
जन्माम्भोधिं वर्त्तते चर्षणीन्द्राः ।
मूले बाह्वोर्द्दधतेऽन्ये पुराणा
लिङ्गान्यन्ये तप्तायुधान्यर्पयन्ते इति ॥
छन्दोगपरिशिष्टे । सहोवाच याज्ञवल्क्यस्तत्-
तुमानात्मर्हितायशङ्खधा हरिमर्चयेत् । सुश्लोकमौर्वेधर्म्मारश्मिरग्निनाधत्ते इति शतपथी श्रुतिः ॥
अथर्व्वपरिशिष्टे तप्तचक्रादिप्रकरणे ।
देवासो येन विततेन बाहुना
सुदर्शनेन प्रयताः स्वर्गमायन् ।
येनाङ्किता मनवो लोकसृष्टिं
वितन्वते ब्राह्मणास्तद्वहन्तीति ॥*॥
किञ्च । पाद्मे श्रीशिवेन तप्तमुद्राप्रसङ्गे ।
विष्णुचक्राङ्कितं विप्रं पूजयेत् सर्व्वकर्म्मणि ।
विष्णुचक्रविहीनन्तु प्रयत्नेन विवर्ज्जयेत् ॥
नारदीये तप्तमुद्राप्रसङ्गे ।
श्रीशङ्खचक्राङ्कविहीनगात्रः
श्मशानतुल्यः पुरुषोऽथ नारी ।
दृष्ट्वा नरस्तं नृपते ! सवासाः
स्नात्वा समर्च्चेद्धरिमङ्घ्रि सद्य इति ॥*॥
यद्यच वेङ्कटाचार्य्यपादप्रभृतिभिर्ब्बुधैः ।
श्रुतयः स्मृतयोऽप्यत्र विख्याता लिखिताः पराः ॥
अतएव तदनादरे दोषाः । पाद्मे ।
तप्तचक्राङ्कितं दृष्ट्वा ये निन्दन्ति नराधमाः ।
अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥
अग्निपुराणे च । दशरथहतपुत्त्रविप्रविलापे ।
शिलाबुद्धिः कृता किंवा प्रतिमायां हरेर्म्मया ।
किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित् ॥
तनूमुद्राङ्कितदेहस्य चेतसा नादरः कृतः ।
येन कर्म्मविपाकेन पुत्त्रशोको ममेदृशः ॥*॥
अथ तप्तमुद्राधारणमाहात्म्यं सौपर्णे ।
अशुचिर्व्वाप्यनाचारः सर्व्वधर्म्मबहिष्कृतः ।
प्रतप्तशङ्खचक्राभ्यामङ्कितः पङ्क्तिपावनः ॥
वाराहे तप्तमुद्राधारणप्रसङ्गे ।
म्लेच्छदेशे शुभे वापि चक्राङ्को यत्र तिष्ठति ।
योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे ! ॥
ब्रह्माण्डे ।
आयुधैर्व्वैष्णवैः सर्व्वैस्तापितैः स्वतनुं यदि ।
चिह्नयेद्वैष्णवो यस्तु स याति परमां गतिम् ॥
पाद्मे च तत्रैव ।
अग्नितप्तं पवित्रञ्च धृत्वा तु बाहुमूलयोः ।
ब्रह्मा यमपुरं घोरं यान्ति विष्णोः परं पदम् ॥
हुताग्नितप्तचक्रेण शरीरं यस्य चिह्नितम् ।
तेन तीर्थानि यज्ञाश्च लभ्यन्ते नात्र संशयः ॥
अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः ।
अङ्कयित्वा जपन्मन्त्रं संसारान्मोक्षभाग्भवेत् ॥
अग्नितप्तेन चक्रेण बाहुमूलेषु लाञ्छिताः ।
ते सर्व्वे पापनिर्म्मुक्ता यान्ति विष्णोः परं पदम् ॥
किञ्च ।
अप्राकृता महात्मानो विष्णुचक्रेण लाञ्छिताः ।
विष्णुचिह्नविहीनास्तु प्राकृताः पतिताः स्मृताः ॥
इति ॥
इत्थं निषेधवचनं निर्मूलं सदनादृतम् ।
समूलं यच्च तत् सम्यग्विध्यभावादितत्परम् ॥*॥
अथ तप्तमुद्राधारणविधिः ।
तप्तमुद्राधारणार्थमुपचारैस्तु पञ्चभिः ।
सम्पूज्य चक्रशङ्खौ तथा नमेत् ॥
तत्र मन्त्रः ।
सुदर्शन ! नमस्तेऽस्तु पाञ्चजन्य नमोऽस्तु ते इति ।